International Journal of Sanskrit Research 2022; 8(3): 287-288

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(3): 287-288
© 2022 IJSR
www.anantaajournal.com
Received: 15-03-2022
Accepted: 27-04-2022

**Arya Lakshmi KA**
Research Scholar, Govt. Sanskrit College, Thiruvananthapuram, Kerala, India

**Corresponding Author:**
**Arya Lakshmi KA**
Research Scholar, Govt. Sanskrit College, Thiruvananthapuram, Kerala, India

# याज्ञवल्क्यस्मृतौ स्त्रीणामार्थिकस्थितिः

**Arya Lakshmi KA**

**संक्षेपः**
धर्मसूत्रप्रोक्तान् वर्णाश्रमादिधर्मान् यथाक्रमं विन्यस्य मानवसमाजस्य श्रेष्ठजीवनं लक्षीकृत्य प्रकल्पिताः नियमसंहिताः एव मनुस्मृत्यादयः स्मृतयः। स्मृतिसाहित्ये यद्यपि विंशत्यधिकाः स्मृतयः समुपलब्धाः तथापि विषयविवेचनदृष्ट्या स्मृतीनामावल्यां मनुस्मृतेः विकसिता तथा वैज्ञानिककेन्द्रिता च विद्यते याज्ञवल्क्यस्मृतिः। ब्रिटिष्प्रशासनकाले हैन्दवनियमानां प्रामाणिकरूपेण आधारीकृतः ग्रन्थोऽपि अयमेवासीत्। अस्य दायभागविधानं भारतीयनियमसंहितानां रचनासु अत्यन्तं प्रभावितं दृश्यते। एवमस्मिन् लघुप्रबन्धे याज्ञवल्क्यमते स्त्रीधनस्य निर्वचनं, अस्योपयोगः कदा करणीयः तथा स्त्रीधनस्योत्तराधिकारविषये च चिन्त्यते। स्त्रीणां आर्थिकसमुन्नतिं संलक्ष्य याज्ञवल्क्येन कन्यायाः कृते पितृसम्पत्तौ उत्तराधिकारित्वं व्यवस्थाप्यते। तेनैव स्वस्मृतौ ऐदंप्राथम्येन गृहिणीभ्यः तथा विधवाभ्यश्च पत्युः सम्पत्तौ उत्तराधिकारित्वं प्रकल्प्यते। सामाजिकप्रसक्तायाः अस्याः स्मृतेः व्यावहारिकांशाः आधुनिकभारतस्य नियमव्यवस्थायामद्यापि वरीवर्तन्ते।

**कूटपदानि:-** स्मृतिसाहित्यं, दायांशविधानं, स्त्रीधनं, कन्या, गृहिणी, विधवा।

## आमुखम्

भारते धर्मव्यवस्था वेदायत्ता एव। वेदो धर्मनिरूपणे स्वतन्त्रभावेन प्रमाणम्, स्मृत्यादयस्तु तन्मूलकतया। अतः वेदमूलत्वात् प्रशस्ता स्मृतीनां आद्या परमप्रामाणिकी च स्मृतिर्भवति मनुस्मृतिः। मनुस्मृतेः पश्चात्कालीना धर्मशास्त्रग्रन्थेषु विश्रुता च काचिदपरा स्मृतिर्भवति याज्ञवल्क्यप्रणीता याज्ञवल्क्यस्मृतिः। यत्र मनुस्मृतिः द्वादशस्वध्यायेषु संविभक्ताः, याज्ञवल्क्यस्मृतिः आचारव्यवहारप्रायश्चित्ताख्यैः केवलं त्रिभिरेवाध्यायैः विभज्यते। कार्यमात्रप्रसक्ता, पुनरुक्तिदोषनिवृत्ता चेयं स्मृतिः अत्यन्तं सरलया भाषया सक्रममुपन्यस्ता दृश्यते। अत एव स्मृतिपरम्परायां अनुपमं किञ्चिद् स्थानं बिभर्तीयं याज्ञवल्क्यस्मृतिः। अस्याः व्यावहारिकमहत्त्वेन आधुनिकभारतस्य नियमव्यवस्थायाः परिकल्पनायां याज्ञवल्क्यस्मृतेः अस्ति किञ्चन महत्तरं योगदानम्। तस्मादेव इदानीन्तनकाले मनुस्मृतेरप्यधिकस्वीकार्यता याज्ञवल्क्यस्मृतेः वर्ततेत्येतत् वस्तुता अस्याः गरिमामेव सन्तनोति। एवं चात्र याज्ञवल्क्यस्मृतेः स्त्रीणामार्थिकव्यवस्थितेः विचिन्तने क्रियमाणे नितरां प्रसक्तः विषयः भवति स्त्रीधनं तथा स्त्रीणां दायांशविधानञ्च। एषु विषयेषु याज्ञवल्क्येनादिष्टानां सामान्यनियमानां निरूपणमत्र क्रियते।

## याज्ञवल्क्यमते स्त्रीधनम्

स्त्रियः सततं पूज्याः माननीयाश्चासन् याज्ञवल्क्यकालीने समाजे। धार्मिककार्याणि स्त्रीणामनुपस्थितौ कदापि न सम्भवन्ति स्म पौराणिकव्यवस्थायाम्। अत एव लोकयात्रायाः निदानरूपेण श्लाघ्यामानानां स्त्रीणां कृते दायांशादिकार्येष्वपि याज्ञवल्क्येन सावहितं नियमाः परिकल्पिताः आसन्।

स्त्रीणां निजसम्पत्तिर्भवति स्त्रीधनं नाम यस्मिन् सर्वासामपि स्त्रीणां पूर्णाधीशत्वं वर्तते। स्त्रीधनविषयविचारे याज्ञवल्क्यः पूर्ववर्तिनः मानवधर्मशास्त्रकारस्य मनोरेव परम्परामनुवर्तमानो दृश्यते। येन स्त्रीधनस्य षड्भेदाः प्रदर्शिताः। तस्यैव मतानुवर्ती विज्ञानेश्वरोऽपि[1] मिताक्षरायां षड्प्रकारकस्य स्त्रीधनस्य स्पष्टीकरणमुच्यते। याज्ञवल्क्यमते पितृमातृपतिभ्रातृणां सकाशाद्वा विवाहवेलायां प्राप्तं वा पत्युः द्वितीयोपयमकाले प्रथमपत्नयाः तोषणनिमित्तं प्रदत्तं वा स्त्रीधनमिति कथ्यते। अपि च बान्धवैः प्रदत्तं वा विवाहानन्तरं पतिकुलाद्वा पितृकुलाद्वा प्राप्तं धनमपि स्त्रीधनत्वेनोच्यतेति अभिप्रैति याज्ञवल्क्यः[2]। विज्ञानेश्वरेण[3] पतिद्वारा स्त्रियै प्रदत्तं तथा दायांशरूपेण प्रदत्तं च धनमपि स्त्रीधनत्वेन मन्यते।

स्त्रीधनस्यास्य उपयोगोऽपि कदा करणीयः इति विषये याज्ञवल्क्येन[4] विवेचनं क्रियते यथा दुर्भिक्षकाले धर्मकार्येषु व्याधिकाले बन्धनादिकाले च भार्यायाः स्त्रीधनं धर्मतः ग्रहीतुमर्हति पतिः। एवमापत्तिकालेषु गृहीतस्य धनस्य प्रत्यर्पणमपि भर्ता न कार्यमासीत्। अतः ज्ञायते यत् अन्यासु अवस्थासु स्वीकृतस्य स्त्रीधनस्य प्रत्यर्पणं करणीयं भवति इति।

मध्ये याज्ञवल्क्येन स्त्रीधनस्यापि उत्तराधिकारविषये विचारः क्रियते। शास्त्रकारैः स्त्रीधनस्योत्तराधिकारिणी पुत्री भवतीत्युच्यते। यतः स्त्रीणां ममता पुत्रीन् प्रति अधिकतया दृश्यतेति कारणेन।

अस्य हेतुरूपेणेदं निरूप्यते यत् पुरुषस्य शुक्लस्य आधिक्येनैव पुत्रस्य जन्म भवति। स्त्रियः रजसः आधिक्येन पुत्रीजन्म च सिद्ध्यति। तस्मात् पुत्र्यां मातुरवयवानां आधिक्येन मातुः सम्पत्तेः उत्तराधिकारिणी पुत्री भवति। एवमेव पुत्रे पुरुषावयवाः अधिकाः भवन्ति। अतः पितृधनस्याधिकारि पुत्रः भवति। स्त्रीषु निःसन्तानासु उत्तराधिकारत्वं तासां पितृणामेव भवति किन्तु यदि स्त्रीणां पुत्र्यः सन्ति तर्हि तद्धनस्य उत्तराधिकारिण्यः केवलं पुत्र्यः एव भवन्ति।

## कन्यायाः अंशभागित्वव्यवस्था

कन्याभ्यः पैतृकसम्पत्तौ उत्तराधिकारः विधीयते स्म याज्ञवल्क्यस्मृतेः दायभागविचारे। भ्रातृहीनकन्यानां पितुः मृत्योः परं पैतृकसम्पत्तौ द्वितीयस्थानं अवर्तत। पितरि मृते सति सम्पत्तेः प्रथमं स्थानं मातुरासीत्। ततः पश्चात् भ्रातृहीनायाः पुत्र्याः आसीत् द्वितीयं स्थानम्। विषयेऽस्मिन् याज्ञवल्क्येन[5] इदं परामृश्यते यत् पुत्रहीनस्य पुरुषस्य वियोगात्परं तस्य सम्पत्तौ पत्नी, पुत्र्यः, पितरौ, भ्रातृजाः गोत्रोत्पन्नः ज्ञातिः, शिष्य एवं ब्रह्मचारि इत्यादिषु उत्तरोत्तरस्य अभावे इतरेषामधिकारो वर्तते क्रमशः। याज्ञवल्क्येन[6] पुत्राभावे एव पुत्र्याः दत्तांशे योग्यता कथ्यते। किन्तु पुत्रे वर्तमाने पुत्र्याः समानाधिकारत्वं नैव विद्यते। याज्ञवल्क्यकालीनसमाजे पुरुषैः समं स्त्रीणामपि आर्थिकसमुन्नतिरासीदिति स्मृतिगतैः दायविचारैः स्पष्टमभिज्ञायते।

## दायांशे गृहिण्याः स्थानम्

प्राचीनभारतीयपरम्परानुसारं गृहस्थस्य अर्धाङ्गिनीनीरूपेण सदा व्यराजत तस्य धर्मपत्नी। यद्यपि पत्नी पुरुषस्य धर्मिकवृत्तिषु सहयोगं करोति तथापि आर्थिकव्यवहारेषु पुरुषसमानस्थानं स्त्रीणां नाविद्यत। विशिष्य प्राक्कालीनाः धर्मसूत्रकाराः शंखनारदादयः स्त्रीणां उत्तराधिकारे विरोधं प्राकटयत्। पुरुषाणां तु स्वस्य पत्न्यै वा पुत्रेभ्यः वा दानं कर्तुमपि अधिकारो नावर्तत। अत एव उच्यते याज्ञवल्क्येन[7] "स्वं कुटुम्बाविरोधेन देयं दारसुतादृते इति। स्त्रीणां दायभागे उत्तराधिकारत्वं याज्ञवल्क्यस्मृतौ एव प्रथमतया नियमितम्। यद्यपि याज्ञवल्क्येन स्त्रीणां साक्षात् सम्पत्तौ उत्तराधिकारत्वं नाकल्पयत् तथापि पुत्रविहीनस्य पुरुषस्य मृत्योः पश्चात् तस्य पत्यै दायभागे प्रथमं स्थानमयच्छत्। तथापि पत्युः आज्ञां विना पत्नी किमपि व्ययं कर्तुं अर्हापि नासीत्। विज्ञानेश्वरेण[8] मिताक्षरायामेवमुल्लिख्यते यत् अपुत्रस्य पुरुषस्य स्वर्गमनात्परं तस्य सदाचारिणी परिणीता स्त्री सकलस्यापि सम्पत्तेः उत्तराधिकारिणी भविष्यतीति।

## विधवायाः उत्तराधिकारत्वम्

सम्पत्तेः उत्तराधिकारिविषये विधवायाः अपि उत्तराधिकारत्वं वर्ततेति कथ्यते याज्ञवल्क्येन[9]। पुत्रविवहीनस्य पुरुषस्य मृत्योः पश्चात् तस्य सम्पत्तौ प्रथमाधिकारः तस्य विधवायाः एव वर्तते। यद्यपि वेदेषु वा इतरधर्मसूत्रग्रन्थेषु वा विधवायाः उत्तराधिकारत्वविषये परमार्शो नैव प्राप्यते चेदपि याज्ञवल्क्यस्मृतौ अस्मिन् विषये उललेखाः विद्यन्ते। याज्ञवल्क्यस्य जीवनवृत्तान्तात् इदमपि ज्ञायते यत् अनेन विधवायाः दायांशविधौ न केवलमेकं सैद्धान्तिकोपस्थापनमकरोत् अपि तु तदीयमृत्योः पश्चात् स्वस्य सम्पत्तिः सर्वमपि पत्नीभ्यां प्रदाय एतस्योत्तराधिकारस्य व्यवस्थापनं चरितार्थमकरोत्। यद्यपि याज्ञवल्क्यः[10] पुत्राभावे विधवायाः सम्पत्तौ पूर्णतया स्वामित्वमुच्यते तथापि तदग्रे तेनेदमप्युच्यते यत् दायांशस्य विभजनानन्तरं यदि पारिवारिकसदस्याः मिलित्वा जीव्यन्ते तर्हि स्मपत्तेः अधिकारः संसृष्टिनः भवति। अस्येतोऽपि स्पष्टं व्याख्यानं विज्ञानेश्वरेणापि[11] दीयते यत् पुत्राभावे सम्पत्तेः ग्रहणं संसृष्टिनः भवति न तु पत्न्यादीनामिति।

## उपसंहारः

स्मृतिकालीनसमाजे स्त्रीणामासीत् किञ्चद्विशिष्टं स्थानम्। स्त्रियः समाजिकव्यवस्थायाः आधारशिलाः आसन्। याज्ञवल्क्यमते स्त्रीणां प्रसक्तिः प्रकृष्टता च मनुकालीनसमाजादपि महत्वाधायि अवर्तत। यतः याज्ञवल्क्यस्मृतेरिव स्त्रीणां सम्पत्तौ उत्तराधिकारित्वं इतरत्र कासुचिदपि स्मृतिषु नैव द्रष्टुं शक्यते। तस्मादस्य ग्रन्थस्य सामाजिकप्रसक्तिं व्यावहारिकप्रासङ्गिकताञ्च दृष्ट्वैव तदीयांशाः आधुनिकनीतिन्यायव्यवस्थायां समाकलिताः दृश्यन्ते।

## सन्दर्भसूची


1. या.स्मृतिः – २/१४३,१४४ मिताक्षराव्याख्या
2. पितृमातृपतिभ्रातृदत्तमध्यग्नुपागतम्
   आधिवेदनिकाद्यं च स्त्रीधनं परिकीर्तितम्॥ या.स्मृतिः – २/१४३
3. या.स्मृतिः -२/१२५, १४३ मिताक्षरा व्याख्या
4. दुर्भिक्षे धर्मकार्ये च व्याधौ सम्प्रतिरोधके
   गृहीतं स्त्रीधनं भर्त्रा न स्त्रियै दातुमर्हति॥ या.स्मृति – २/१४७
5. या.स्मृतिः – २/१३५-१३६
6. भगिन्यश्च निजादंशात् दत्त्वांशं तु तुरीयकम्॥ या.स्मृतिः – २/१२४
7. या.स्मृतिः – २/१७५
8. तस्मादपुत्रस्य स्वर्थातस्य विभक्तस्य संसृष्टिनो धनं परिणीता स्त्री संयता सकलमेव गृह्णतीति स्थितिम्॥ या. स्मृतिः – २/१३५ मिताक्षराव्याख्या
9. या.स्मृतिः – २/१३५-१३६
10. या.स्मृतिः – २/१३८
11. पुत्राभावेसंसृष्ट्येवापहरेत्, गृह्णीयात् न पत्न्यादिः या.स्मृतिः – २/१३८ मिताक्षराव्याख्या
12. डॉ. प्रतिभा आर्य, स्मृतियों में नारी, विश्वभारती अनुसंधान परिषद, ज्ञानपुर (वाराणासी), १९८९.
13. डॉ. गुप्ता ऊषा, याज्ञवल्क्यस्मृतिः, सं. पाण्डेय उमेश चन्द्र, चौखम्बा संस्कृत सिरीस्, वारणसी, १९६७
14. याज्ञवल्क्यस्मृतिः, मिताक्षरा, व्यवहार बालम्बट्टी, वीरमित्रोदय, चौखम्बा संस्कृत सिरीस्, वारणसी, १९३०
15. Manjushree. The Position of Women in the Yajnavalkyasmrti. New Delhi: Prachi Publishers & Distributors, 1997.